# Model Question Paper

**I Sem B.Voc (RM). Examination**

**LANGUAGE – SANSKRIT 1**

**Kumarsambhavam V Canto, Grammar and Comprehension**

Time: 2hrs Max. Marks: 60

Instructions: 1) Answer in Sanskrit / Kannada / English

2) Answer Q.Nos I, V and IV in Sanskrit only

I. समीचीनम् उत्तरं लिखत । 1x10 =10

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select and write the correct answer.

1. कविकुलगुरुः कः ?

   अ) भासः आ) वाल्मीकिः इ) कालिदासः ई) इन्द्रः

2. कति विधानि दृश्यकाव्यानि सन्ति ?

   अ) चत्वारि आ) पञ्च इ) त्रीणि ई) षट्

3. कुमारसम्भवस्य कर्ता कः ?

   अ) वाल्मीकिः आ) कालिदासः इ) शौनकः ई) व्यासः

4. शिवः केन वेषेण तपोवनमागच्छति ?

   अ) वटुवेषेण आ) पशुवेषेण इ) काकवेषेण ई) बकवेषेण

5. पार्वती कस्य पुत्री ?

   अ) हरेः आ) ब्रह्मणः इ) हिमालयस्य ई) अगस्त्यस्य

6. तपः कर्तुं पार्वती कुत्र गतवती ?

   अ) गौरीशिखरम् आ) मेरुशिखरम् इ) हिमशिखरम् ई) विध्यशिखरम्

7. ब्रह्मचारी कथमसीत् ?

   अ) कुरूपी आ) जटिलः इ) पुष्पालङ्कृतः ई) चन्दनचर्चितः

8. आद्यं धर्मसाधनं किम् ?

   अ) वाक् आ) प्राणः इ) शरीरम् ई) ह्रीः

9. अपर्णा इति कस्याः नाम ?

अ) पार्वत्याः आ) लक्ष्म्याः इ) सरस्वत्याः ई) सुशीलायाः

10. धर्मवृद्धेषु किं न समीक्ष्यते ?

अ) कालः आ) धनम् इ) वयः ई) अर्थः

II. द्वयोः प्रबन्धं लिखत । ಎರಡಕ್ಕೆ ಪ್ರಬಂಧ ಬರೆಯಿರಿ. 2x8 =16

Write an essay on any two of the following.

अ) कुमारसंभवस्य पञ्चमसर्गस्य सारांशं विवृणुत ।
ಕುಮಾರಸಂಭವದ ಐದನೇ ಸರ್ಗದ ಸಾರಾಂಶವನ್ನು ವರ್ಣಿಸಿರಿ.
Write the summary of 5th canto of kumarasambhava.

आ) महाकाव्यलक्षणानि विवृणुत ।
ಮಹಾಕಾವ್ಯದ ಲಕ್ಷಣಗಳನ್ನು ವರ್ಣಿಸಿರಿ.
Describe the charecteristics of Mahakavya

इ) ब्रह्मचारिणे पार्वत्याः प्रत्युत्तरमधिकृत्य लिखत ।
ಬ್ರಹ್ಮಚಾರಿಗೆ ಪಾರ್ವತಿಯ ಪ್ರತ್ಯುತ್ತರವನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.
Write about the reply of Parvati to Brahmacari.

III. त्रयाणां श्लोकानाम् अनुवादं कृत्वा विवृणुत । 3x3 =9

ಯಾವುದಾದರೂ ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate any three shlokas and explain.

१. तथा समक्षं दहता मनोभवं पिनाकिना दग्धमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

२. विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम्।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसन्ततिः ॥

३. कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभुपागन्न धर्मवृद्धेषु वयः समीक्ष्यते ॥

४. यदा फलं पूर्वतपस्समाधिना न तावता लभ्यममंस्त काङ्क्षितम्।

तदानपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ॥

५. स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः।

वलीषु तस्याः स्खलिता प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ॥

IV. वाक्यद्वयं ससन्दर्भं विवृणुत । 2x3 = 6

ಯಾವುದಾದರೂ ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಸಂದರ್ಭ ವಿವರಿಸಿ.

Explain with reference to context any two of the following sentences.

१. तथाविधं प्रेम पतिश्च तादृशः ।

२. तपः क्व वत्से क्व च तावकं वपुः।

३. ध्रुवं वपुः काञ्चनपद्मनिर्मितम् ।

४. वदन्त्यपर्णेति च ताम् पुराविदः ।

V. संस्कृतभाषया उत्तराणि लिखत ।

अ) पञ्चानां लिङ्ग-विभक्ति-वचनानि लिखत । 5x1 =5

| | | | |
|---|---|---|---|
| १. रामस्य | २. हरौ | ३. भगवता | ४. भक्ताः |
| ५. ययोः | ६. अधिकारिणः | ७. नैधाघे | ८. सरसि |

आ) चतुर्णां लकार-पुरुष-वचनानि लिखत । 4x1 =4

| | | | |
|---|---|---|---|
| १. पठन्तु | २. लभेय | ३. निनाद | ४. भविष्यसि |
| ५. अभूत् | ६. अगच्छन् | ७. करोमि | ८. सीदन्ति |

VI. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि सस्कृतभाषया लिखत । 2x5=10

गोदावार्याः तीरे एकः विशालः शाल्मलीतरुः आसीत्। तत्र नानादिग्देशादागत्य पक्षिणः रात्रौ निवसन्ति स्म। एकदा एकः कपोतानां यूथम् आकाशे विसर्पन् भूमौ तण्डुलानां कणान् अपश्यत्। कपोतानां राजा चित्रग्रीवः 'कथम् अस्मिन् निर्जने वने तण्डुलकणानां सम्भवः। भद्रमिदं न पश्यामि। सम्यक् निरूप्य अवतरत। ' इति कपोतान् अवदत्। परन्तु जिह्वालोलुपाः अन्ये कपोताः अवधीर्य चित्रग्रीववचनम् अवतार्य पाशे बद्धाः अभवन्। अत एव उच्यते – सहसा विदधीत न क्रियाम् इति।

अधोलिखितप्रश्नानाम् उत्तरं संस्कृतभाषया लिखत ।

१ चित्रग्रीवः किमवदत् ?

२ पक्षिणः कुत्र निवसन्ति ?

३ शाल्मलीतरुः कुत्र आसीत् ?

४ अस्याः नीतिः का ?

५ कपोताः कुत्र बद्धाः अभवन् ?

----------------------